विज्ञानमयः । तेनैष पूर्णः । स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयम्पुरुषविधः । तस्य श्रद्धैव शिरः । ऋतन्दक्षिणः पक्षः । सत्यमुत्तरः पक्षः । योग आत्मा । महः पुच्छम्प्रतिष्ठा । तदप्येष श्लोको भवति । [२९] विज्ञानय्यँज्ञन्तनुते । कर्माणि तनुतेऽपि च । विज्ञानन्देवास्सर्वे । ब्रह्म ज्येष्ठमुपासते । विज्ञानम्ब्रह्म चेद्वेद । तस्माच्चेन्न प्रमाद्यति । शरीरे पाप्मनो हित्वा । सर्वान्कामान्थ्समश्नुत इति । तस्यैष एव शारीर आत्मा । यः पूर्वस्य । तस्माद्वा एतस्माद्विज्ञानमयात् । अन्योऽन्तर आत्माऽऽनन्दमयः । तेनैष पूर्णः । स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयम्पुरुषविधः । तस्य प्रियमेव शिरः । मोदो दक्षिणः पक्षः । प्रमोद उत्तरः पक्षः । आनन्द आत्मा । ब्रह्म पुच्छम्प्रतिष्ठा । तदप्येष श्लोको भवति । [३०] असन्नेव स भवति । असद्ब्रह्मेति वेद चेत् । अस्ति ब्रह्मेति चेद्वेद । सन्तमेनन्ततो विदुरिति । तस्यैष एव शारीर आत्मा । यः पूर्वस्य । अथातोऽनुप्रश्नाः । उताविद्वानमुँल्लोकम्प्रेत्य । कश्चन गच्छती(३) । आहो विद्वानमुँल्लोकम्प्रेत्य । कश्चित्समश्नुता(३)उ । सोऽकामयत । बहु स्याम्प्रजायेयेति । स तपोऽतप्यत । स तपस्तप्त्वा । इदꣳ सर्वमसृजत । यदिदङ्किञ्च । तथ्सृष्ट्वा । तदेवानुप्राविशत् । तदनुप्रविश्य । सच्च त्यच्चाभवत् । निरुक्तञ्चानिरुक्तञ्च । निलयनञ्चानिलयनञ्च । विज्ञानञ्चाविज्ञानञ्च । सत्यञ्चानृतञ्च सत्यमभवत् । यदिदङ्किञ्च । तथ्सत्यमित्याचक्षते । तदप्येष श्लोको भवति । [३१] असद्वा इदमग्र आसीत् । ततो वै सदजायत । तदात्मानꣳ स्वयमकुरुत । तस्मात्तथ्सुकृतमुच्यत इति । यद्वै तथ्सुकृतम् । रसो वै सः । रसꣳ ह्येवायँल्लब्ध्वाऽऽनन्दी भवति । को ह्येवान्यात्कः प्राण्यात् । यदेष आकाश आनन्दो न स्यात् । एष ह्येवानन्दयाति । यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयम्प्रतिष्ठाँविन्दते । अथ सोऽभयङ्गतो भवति । यदा ह्येवैष एतस्मिन्नुदरमन्तरङ्कुरुते । अथ तस्य भयम्भवति । तत्त्वेव भयँविदुषोऽमन्वानस्य । तदप्येष श्लोको भवति । [३२] भीषाऽस्माद्वातः पवते । भीषोदेति सूर्यः । भीषाऽस्मादग्निश्चेन्द्रश्च । मृत्युर्धावति पञ्चम इति । सैषाऽऽनन्दस्य मीमाꣳसा भवति । युवा स्याथ्साधुयुवाऽध्यायकः । आशिष्ठो दृढिष्ठो बलिष्ठः । तस्येयम्पृथिवी सर्वा वित्तस्य पूर्णा स्यात् । स एको मानुष आनन्दः । ते ये शतम्मानुषा आनन्दाः ।[ ] स एको मनुष्यगन्धर्वाणामानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतम्मनुष्यगन्धर्वाणामानन्दाः । स एको देवगन्धर्वाणामानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतन्देवगन्धर्वाणामानन्दाः । स एकः पितृणाञ्चिरलोकलोकानामानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतम्पितृणाञ्चिरलोकलोकानामानन्दाः । स एक आजानजानान्देवानामानन्दः ।[ ] श्रोत्रियस्य चाकामहतस्य । ते ये शतमाजानजानान्देवानामानन्दाः । स एकः कर्मदेवानान्देवानामानन्दः । ये कर्मणा देवानपियन्ति । श्रोत्रियस्य चाकामहतस्य । ते ये शतङ्कर्मदेवानान्देवानामानन्दाः । स एको देवानामानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतन्देवानामानन्दाः । स एक इन्द्रस्यानन्दः ।[ ] श्रोत्रियस्य चाकामहतस्य । ते ये शतमिन्द्रस्यानन्दाः । स एको बृहस्पतेरानन्दः । श्रोत्रियस्य चाकामहतस्य ।